संस्कृत
[illegible]

प्रयोग

विधिः स्मार्त

धातुमूर्तिप्रतिष्ठाविधिः

३७१३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशायनमः॥ अथनूतनधातुमूर्तिप्रतिष्ठा
देशकालौ स्मृत्वा दशपूर्वान्दशापरानू आत्मना सह
उद्धर्तुकामः श्रीपर० र्थं अमुकधातुमूर्तेः प्रतिष्ठांक
रिष्ये॥ तदंगगणप० स्वस्तिपु० मा० नांदीश्रा० ष्ये॥ तानि
कृत्वा। आचार्यमृत्विजश्च वृणुयात्॥ आचार्यः यवव्रे
ति सर्षपान्विकीर्य॥ शुचीवोहव्या० आपोहिष्ठा० शं
नइंद्राग्नीसूक्तेन पंचगव्येन प्रोक्षयेत्॥ ततः पूर्वा
दिदिक्षु चतुः कलशान्संस्थाप्य। महीद्यौरित्यादि
मंत्रैः पंचपल्लवसप्तधान्यसप्तमृत्तिकापंचरत्ना
नि विधिवत्कलशान्निक्षिप्य क्रमेण पूजयेत्॥ चतुः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2). कलशे पूर्णपात्रोपरि प्रतिमां संस्थाप्य। पूर्वे इंद्रं। दक्षि
णे रुद्रं २ पश्चिमे वरुणं ३ उत्तरे विष्णुं ४॥ तता: देवता:
पूजां कृत्वा। ऋत्विज: प्रतिदिक्षु क्रमेण एतानि सूक्ता
नि जपेयु:। तानि च। शंनिसूक्तं। रुद्रसूक्तं॥ वरुणसूक्तं॥
रक्षोहणसूक्तं। आशु: शिशान इति सूक्तेन मूर्ति: जल
मासिच्य॥ पंचगव्येन पंचामृतै: पृथक् प्रोक्ष्य॥ आ
पो हि ष्ठेति स्नात्वा। स्योना पृथिवीति सप्तमृत्तिका
भि: संलिप्य। मा नस्तोके। तश्यरमोहुर्तं न प्रक्षाल्य॥
धात्रीचूर्णं गोमयं सुगंधद्रव्यं पुनर्विलिप्य प्रक्षा
ल्य। पवमानसूक्तं वर्गद्वयं। पुरुषसूक्तं। विष्णुसूक्तं।
अपश्यं त्वा १ तरत्समं १ यदंति यच्च १ न तमंहो १ य ॥१॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

जुत्राग्नतो० सर्वोवैरुद्रइति अभिषेकः कार्यः॥ देवस्यवस्त्रे
(२A) णाच्छाद्य॥ ततोग्नि प्रतिष्ठापनादि चक्षुषीआज्येनेत्यंतमुक्त्वा
अत्रप्रधानं॥ प्रधानदेवताअष्टोत्तरसहस्रमष्टोत्तरशतमष्टा
विंशतिर्वापलाशसमिद्भिः पायसेनघृताक्ततिलैर्वासंख्या
काभिः तथाचइंद्रं रुद्रं वरुणं विष्णुं। चरुतिलाज्यद्रव्येण
अष्टोत्तरशतंअष्टाविंशतिर्वासंख्याकाभिः प्रतिमंत्रैः प
थक्। शेषेणस्विष्टकृतमित्यादि आज्यभागांतं हुत्वामंत्रैर्जु
हुयात्॥ तत्रमंत्राः॥ प्रधानदेवतामूलमंत्रेण॥ इंद्रादिदेव
तामंत्राः॥ इंद्रंवोवि० कद्रुद्राय० यच्चिद्धिते० इदंविष्णु० उत्तर
कलशेआहुतिशेषंनिक्षिप्य। पूर्वकलशोदकेदेवस्या
ग्रतअथर्वशीर्षमभिषिच्य॥ देहोवैस्वर्गसंततथाराअष्टो
त्तरशतमावर्तनं॥ यकुंदसीअ० प्रजापते० यीणामितिमंत्रा
भ्यामसुरापिष्टंवाकाक० चोरेंगुहलेकपूररालाकस्तुरीचंदन

"Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3) भद्रमोथेराणि सुगंधद्रव्याणि विलिप्य ॥ ततः देवस्य अग्न्युत्ता
रणादि कुर्यात् ॥ अस्याः अमुकधातुमूर्तेः सर्वावयवसंपूर्णदेश
काल सान्निध्यार्थं तापोपशमनार्थं श्रीप० अग्न्युत्तारणपूर्वकं
प्राणप्रतिष्ठां करिष्ये ॥ इति संकल्प्य ॥ नेत्रोन्मीलनं कुर्यात् ॥ तत्र वस्तु
दे० ॐ यां यीं यूं यैं यौं यः सां सीं सूं सैं सौं सः ॥ रां रीं रूं रैं रौं रः ॥ द
धिभक्तनैवेद्यं ॥ ततः पंचोपचारैः संपूज्य ॥ देवस्य प्रार्थना ॥
पुरुषसूक्तं ध्रुवाद्यौरिति मंत्रैः त्रिवारं पठेत् ॥ देवस्य पुरुषसूक्तेन
न्यासं कुर्यात् ॥ ततो ध्यानादि पंचामृतैः पूजां कृत्वा गंधादिभिः संपूज्य ॥
दक्षिणकलशोदकेन रुद्रसूक्तेनाभिषेकं कुर्यात् ॥ पश्चिमकलशोदके
न कस्यनूनं क० सूक्तेनाभिः ॥ उत्तरकलशोदकेन यज्जाग्रतोस्यनुवाकं
कयानश्चित्र इति ऋचा विष्णुसूक्तेन चाभि० ॥ लिंगप्रतिष्ठाविधौ तु ॥ भवायदे
वाय इत्याद्यावाह्य ॥ भवस्यदेवस्यपत्न्यै नम इत्यादि उदकं क्षिपेत् ॥ महाभिषेका
दि पूजां महानैवेद्यं कृत्वा ॥ स्विष्टकृतादि होमशेषं समाप्य ॥ आचार्याय प्रति २
मां धेनुं च दत्वा ऋत्विग्भ्यः दक्षिणां दद्यात् ॥ स्तुति नामावलि स्तोत्रं पठित्वा
यथाशक्ति ब्राह्मणान् भोजयित्वा ॥ इति संग्रहोद्धृत धातुमूर्ति प्रतिष्ठाविधिः ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com